# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| | | |
|---|---|---|
| **कक्षा** –आचार्यद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ५** | **गुणाः – ७०** |
| **विषयः – ज्यौतिषशास्त्रम्** | (C.E.- 5.3.3. New ) | |
| **दिनाङ्कः – ०८/१२/२०१८** | **मानसागरी** | **समयः –१०.०० तः १.००** |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कस्यचित् एकस्य उपरि व्याख्यां लिखतु ।** **( ५ )**

*(१) श्रुतिशास्त्रगेयकुशलो धर्मरतः काव्यकृन्मनस्वी च ।*
*सर्वहितो रुचिरतनुः सुनकायां सोमजो भवति ॥*

*(२) सप्रमे भवने भौमः पञ्चमे च दिवाकरः ।*
*अरण्ये च भवेज्जन्म जनशून्ये न संशयः ॥*

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु ।** **( १० )**

*(१) सहजतृतीयभावविचारः (२) राजयोगाध्यायस्य सारांशः ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्य व्याख्यां करोतु ।** **( ५ )**

*(१) शुद्धे रन्ध्रे केन्द्रगैः सौम्यखेटैर्लग्ने जीवेधर्मइन्दूदयश्चेत् ।*
*नो सदृष्टाः पापखेटैस्तदास्यादायुर्मानं सप्ततिर्वत्सराणाम् ॥*

*(२) पञ्चाब्धयः सुराः सूर्याः खण्डकांक्षाः क्रमादमी ।*
*सायनग्रहदोराशि–तुल्यखण्डयुतिश्च सा ॥*
*भामादिकहतादेष्यात् त्रिंशल्लब्धयुता लवाः ।*
*स्वमृणं तुलमेषादौ शनीन्द्वोश्च त्रिराशिषु ॥*

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य विवर्णनं करोतु ।** **( १० )**

*(१) भाग्योदयकालः । (२) सूर्यकालानलचक्रम् ।*

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कस्यचित् एकस्य व्याख्यां करोतु ।** **( ५ )**

*(१) धर्माऽधर्माप्तिसौख्यानि वस्त्रालङ्करणैस्तथा ।*
*प्राप्नोत्यन्तर्दशायां हि चन्द्रस्यैव गुरोर्यदा ॥*

*(२) सर्वत्रलभते लाभं गजाश्वगोधनादिकम् ।*
*जायते कन्यकालाभश्चन्द्रस्यान्तर्गते बुधे ॥*

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **(१०)**

*(१) अष्टकवर्गाध्यायः। (२) विंशोत्तरीसूर्यमहादशाफलम्।*

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य उपरि व्याख्यां करोतु ।** **(५)**

*(१) शस्त्राभिघातवधवन्धनरेन्द्रपीडा चिन्ताग्रहो विकलरुक् च गृहश्रमेषु।*
*चौराग्निभीतिधननाशयशः प्रणाशं कुर्याद्विघातभयमत्रदशाकुजस्य॥*

*(२) ज्ञानधर्मार्थनाशश्च कलहो व्यसनं भवेत्।*
*कटुकं मिष्टभोज्यं च राहोरुददशां गुरुः॥*

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्य उपरि विवर्णनं करोतु।** **(१०)**

*(१) गुरुमहादशान्तर्दशाफलम्। (२) मंगलान्तर्दशायां अन्तर्दशाफलम्।*

**पञ्चमान्वितिः**

**प्रश्नः ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामैकैकवाक्येन लघूत्तरं लिखन्तु।** **(१०)**

*(१) यदि बुधः सुनफायोगकारकः भवति तदा जातकोत्पन्नफलं किम्?*
*(२) सिंहासनयोगः कदा भवति?*
*(३) सिंहासनयोगस्य फलं किम्?*
*(४) हंसयोगस्य फलं किम्?*
*(५) प्रथम, द्वितीय, द्वादशस्थाने सर्वे ग्रहाः भवन्ति चेत् कः योगः भवति?*
*(६) पूर्णचन्द्रस्य फलं किम्?*
*(७) एकादशभावे सर्वेषां ग्रहाणां फलं किम्?*
*(८) एकादशभावे भौमग्रहस्य योगः भवति चेत् फलं किम्?*
*(९) वर्षपतिः कः भवति?*
*(१०) अहोरात्रे कति होरा भवन्ति?*
*(११) राहुमहादशायां गुर्वन्तर्दशा भवति चेत् फलं किम्?*
*(१२) शनिमहादशायां सूर्यान्तर्दशा भवति चेत् फलं किम्?*
*(१३) चन्द्रमहादशायां बुधान्तर्दशा भवति चेत् फलं किम्?*
*(१४) केत्वन्तरे केतोरेव प्रत्यन्तरं भवति तदा फलं किम्?*
*(१५) मङ्गलादियोगिनीतः ग्रहाणामोत्पत्तिः भवति तदा मङ्गलायोगिनीतः कः ग्रहः उत्पद्यते?*

--००--